# शब्दकल्पद्रुमः।

## चतुर्थकाण्डम्।



य, अन्तःस्थयकारः। स च षड्‌विंशव्यञ्जनवर्णः॥ अस्योच्चारणस्थानं तालु। (यदुक्तं सिद्धान्तकौमुद्याम्। "इचुयशानां तालु॥" तथा च शिक्षायाम्। १७।
"कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू॥")
तस्य स्वरूपं यथा,—
"यकारं शृणु चार्व्वङ्गि! चतुष्कोणमयं सदा।
पलालधूमसङ्काशं स्वयं परमकुण्डली॥
पञ्चप्राणमयं वर्णं पञ्चदेवमयं सदा।
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं तथा।
प्रणमामि सदा वर्णं मूर्त्तिमन्मोक्षमव्ययम्॥"
इति कामधेनुतन्त्रे ५ पटलः॥
वङ्गीयवर्णमालायामस्य लेखनप्रकारो यथा,—
"ऊर्द्ध्वाधःक्रमतो रेखा चतुष्कोणमयी शुभा।
नारायणेशविधयस्तासु तिष्ठन्ति नित्यशः॥
मात्रा कुण्डलिनी ज्ञेया ध्यानमस्य प्रचक्ष्यते॥"
तस्य ध्यानं यथा,—
"धूम्रवर्णां महारौद्रीं षड्‌भुजां रक्तलोचनाम्।
रक्ताम्बरपरीधानां नानालङ्कारभूषिताम्॥
महामोक्षप्रदां नित्यामष्टसिद्धिप्रदायिनीम्।
एवं ध्यात्वा यकारन्तु तन्मन्त्रं दशधा जपेत्॥"*॥
तत्प्रणाममन्त्रो यथा,—
"त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा।
प्रणमामि सदा वर्णं शक्तिमामोक्षमव्ययम्॥"
इति वर्णोद्धारतन्त्रम्॥
अस्य नामानि यथा,—
"यो वाणी वसुधा वायुर्व्विकृतिः पुरुषोत्तमः।
युगान्तः श्वसनः शीघ्रो धूमार्च्चिः प्राणिसेवकः॥
शङ्खाभ्रमो जटी लोला वायुवेगी यशस्करी।
सङ्कर्षणः क्षपा बालो हृदयं कपिलाप्रभा॥
आग्नेयो व्यापकस्त्यागी होमो यानं प्रभा सुखम्।
चण्डः सर्व्वेश्वरी धूमश्चामुण्डा सुमुखेश्वरी॥
त्वगात्मा मलयो माता हंसिनी भृङ्गिनायकः।
वैनमः शोषको मीनो धनिष्ठानङ्गवेदिनी।
मेढ्रः सोमः पत्तिनामा पापहा प्राणसंज्ञकः॥"
इति नानातन्त्रशास्त्रम्॥

(धात्वनुबन्धविशेषः। स तु दिवादिगणसूचकः। तथा च कविकल्पद्रुमे। "दिवादौ यादादिकः॥" छन्दःशास्त्रान्तर्गतगणविशेषः। तथा च छन्दोमञ्जर्य्याम्।
"आदिगुरुः पुनरादिलघुर्यः॥"
अस्य साङ्केतिकचिह्नं यथा, ।ऽऽ ;
काव्यादौ अस्य प्रथमप्रयोगे लक्ष्मीलाभः फलम्। यथा, वृत्तरत्नाकरटीकायाम्।
"यो लक्ष्मीं रसु दाहं यसनमय लवौ शः सुखं
यस्तु खेदम्॥")
यः, पुं, (याति वातीति। या गतौ + डः।) वायुः। यशः। योगः। यानम्। याता। इति शब्दरत्नावली॥ सर्व्वनाम। यच्छब्दार्थे इति यावत्। इति विश्वः॥
यकः, त्रि, यः। ये इति भाषा। यच्छब्दस्य टेरत्वे टेः पूर्व्वं अकागमेन निष्पन्नः॥ ("अव्ययसर्व्वनाम्नामकच् प्राक् टेः।" ५।३।७१। इति पाणिनिसूत्रम्। यथा, ऋग्वेदे। ८।२१।१८।
"चित्र इद्राजा राजका इदन्यके यके सरस्वतीमनु॥")
यकृत्, क्ली, (यज् + "शकेर्ऋतिन्।" उणा० ४।५८। इत्यत्र "बाहुलकात् यजेः कश्च।" इत्युज्ज्वलदत्तोक्त्या ऋतिन् जस्य च कः।) कुक्षेर्दक्षिणभागस्थमांसखण्डम्। तत्पर्य्यायः। कालखण्डम् २। इत्यमरः। २।६।६६॥ कालखञ्जम् ३ कालेयम् ४ कालकम् ५। इति हेमचन्द्रः॥ करण्डा ६ महास्नायुः ७। इति रभसः॥*॥ (यथा, ऋग्वेदे। १०।१६३।३।
"यक्नं मतस्नाभ्यां यक्नः प्लाशिभ्यो विवृहामि ते।"
"यक्नः हृदयसमीपे वर्त्तमानः कालमांसविशेषो यकृत् तस्मात्।" इति तद्भाष्ये सायणः॥)
अथ शरीरावयवविशेषस्य यकृतः स्वरूपमाह।
"अधो दक्षिणतश्चापि हृदयाद्‌यकृतः स्थितिः।
तत्तु रञ्जकपित्तस्य स्थानं शोणितजं मतम्॥"
अथ यकृद्रोगमाह।
"प्लीहामयस्य हेत्वादि समस्तं यकृदामये।
किन्तु स्थितिस्तयोर्ज्ञेया वामदक्षिणपार्श्वयोः॥"
अथ यकृद्रोगचिकित्सा।
"प्लीहोद्दिष्टाः क्रियाः सर्व्वा यकृत्यपि समाचरेत्।
कार्य्यश्च दक्षिणे बाहौ तत्र शोणितमोक्षणम्॥
क्षारश्च विड़कणाभ्यां पूतिकस्याम्बु निस्रुतम्।
पिबेत् प्रातर्य्यथावह्नि यकृत्प्लीहप्रशान्तये॥"
इति भावप्रकाशः॥
(तथा च।
"वातेनोदीरितं रक्तं कफेन च घनीकृतम्।
पित्तेन पाकतां प्राप्तं त्रिदोषसंश्रितं यकृत्॥
लक्षणं तस्य वक्ष्यामि तेन तच्चापि लक्षयेत्।
क्षीयते तेन मनुजो मृत्युराशु प्रवर्त्तते॥
वमिक्लमस्तथोद्गारो हृल्लासः श्वसनं भ्रमः।
दाहोऽरुचिस्तृषामूर्च्छा कण्ठे दाहः शिरोव्यथा॥
हृच्छूलञ्च प्रतिश्यायः ष्ठीवनं कटुकासहः।
सशल्यं हृदि शूलञ्च निद्रानाशः प्रलापतः॥
हृदये मन्यते जाड्यं उदरं गच्छते भृशम्।
एतैर्लिङ्गैर्व्विजानीयात् यकृत् कोष्ठे च वक्षसि॥"
अथास्य चिकित्सा।
"निम्बनीपश्वचेतसं शिवा
काश्मरी च तुलसी च सिंहिका।
क्वाथ एव हृदयामयापह
आशु शूलयकृतं स नाशकृत्॥
सौराष्ट्रीकासीसमहौषधानि
दुरालभाजातिप्रवालकञ्च।
दार्व्वीं यमानी ककुभः समङ्गा
क्वाथः ससर्पिर्य्यकृदाशु हन्ति॥"
इति हारीते चिकित्सितस्थाने चतुर्थेऽध्याये॥
"प्लीहवद्दक्षिणात् पार्श्वात् कुर्य्याद्‌यकृदपि च्युतम्॥"
इति वाभटे निदानस्थाने द्वादशेऽध्याये॥)
यकृदात्मिका, स्त्री, (यकृत इवात्मा स्वरूपं यस्याः। बहुव्रीहौ कः। टापि अत इत्वम्।) तैलपायिका। इति शब्दचन्द्रिका॥